Mantra Pushpam

मन्त्रपुष्पम्

NityaPaath
nityapaath.com/mantra-pushpam-full/

MANTRA · मन्त्रपुष्पम् (तै. आ. १.२२)

1 ॐ॥ योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति।
चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति। य एवं वेद।

Om. yopam pushpam veda. pushpavan prajavan pashuman bhavati.
Chandrama va apam pushpam. pushpavan prajavan pashuman bhavati. ya evam veda.

2 योऽपामायतनं वेद। आयतनवान् भवति। अग्निर्वा अपामायतनम्। आयतनवान् भवति।
योऽग्नेरायतनं वेद॥ आयतनवान् भवति। आपो वा अग्नेरायतनम्। आयतनवान् भवति। य एवं वेद।

Yopam ayatanam veda. ayatanavan bhavati. agnir va apam ayatanam. ayatanavan bhavati.
Yogner ayatanam veda. ayatanavan bhavati. apo va agner ayatanam. ayatanavan bhavati. ya evam veda.

3 योऽपामायतनं वेद। आयतनवान् भवति। वायुर्वा अपामायतनम्। आयतनवान् भवति।
यो वायोरायतनं वेद। आयतनवान् भवति॥ आपो वै वायोरायतनम्। आयतनवान् भवति। य एवं वेद।

Yopam ayatanam veda. ayatanavan bhavati. vayur va apam ayatanam. ayatanavan bhavati.
Yo vayor ayatanam veda. ayatanavan bhavati. apo vai vayor ayatanam. ayatanavan bhavati. ya evam veda.

4 योऽपामायतनं वेद। आयतनवान् भवति। असौ वै तपन्नपामायतनम्। आयतनवान् भवति।
योऽमुष्य तपत आयतनं वेद। आयतनवान् भवति। आपो वा अमुष्य तपत आयतनम्॥ आयतनवान् भवति। य एवं वेद।

Yopam ayatanam veda. ayatanavan bhavati. asau vai tapannapam ayatanam. ayatanavan bhavati.
Yomushya tapata ayatanam veda. ayatanavan bhavati. apo va amushya tapata ayatanam. ayatanavan bhavati. ya evam veda.

5 योऽपामायतनं वेद। आयतनवान् भवति। चन्द्रमा वा अपामायतनम्। आयतनवान् भवति।
यश्चन्द्रमस आयतनं वेद। आयतनवान् भवति। आपो वै चन्द्रमस आयतनम्। आयतनवान् भवति॥ य एवं वेद।

Yopam ayatanam veda. ayatanavan bhavati. chandrama va apam ayatanam. ayatanavan bhavati.
Yash chandramasa ayatanam veda. ayatanavan bhavati. apo vai chandramasa ayatanam. ayatanavan bhavati. ya evam veda.

6 योऽपामायतनं वेद। आयतनवान् भवति। नक्षत्राणि वा अपामायतनम्। आयतनवान् भवति।
यो नक्षत्राणामायतनं वेद। आयतनवान् भवति। आपो वै नक्षत्राणामायतनम्। आयतनवान् भवति। य एवं वेद॥

Yopam ayatanam veda. ayatanavan bhavati. nakshatrani va apam ayatanam. ayatanavan bhavati.
Yo nakshatranam ayatanam veda. ayatanavan bhavati. apo vai nakshatranam ayatanam. ayatanavan bhavati. ya evam veda.

7 योऽपामायतनं वेद। आयतनवान् भवति। पर्जन्यो वा अपामायतनम्। आयतनवान् भवति।
यः पर्जन्यस्यायतनं वेद। आयतनवान् भवति। आपो वै पर्जन्यस्याऽऽयतनम्। आयतनवान् भवति। य एवं वेद।

Yopam ayatanam veda. ayatanavan bhavati. parjanyo va apam ayatanam. ayatanavan bhavati.
Yah parjanyasyayatanam veda. ayatanavan bhavati. apo vai parjanyasyayatanam. ayatanavan bhavati. ya evam veda.

8 योऽपामायतनं वेद॥ आयतनवान् भवति। संवत्सरो वा अपामायतनम्। आयतनवान् भवति।
यस्संवत्सरस्यायतनं वेद। आयतनवान् भवति। आपो वै संवत्सरस्यायतनम्। आयतनवान् भवति। य एवं वेद।

Yopam ayatanam veda. ayatanavan bhavati. sanvatsaro va apam ayatanam. ayatanavan bhavati.
Yas sanvatsarasyayatanam veda. ayatanavan bhavati. apo vai sanvatsarasyayatanam. ayatanavan bhavati. ya evam veda.

9 योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति॥

Yopsu navam pratishthitam veda. praty eva tishthati.

MANTRA · राजाधिराजाय (तै. आ. १.३१.६)

10 ॐ राजाधिराजाय प्रसह्यसाहिने। नमो वयं वैश्रवणाय कुर्महे।
स मे कामान्कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु।
कुबेराय वैश्रवणाय। महाराजाय नमः।

Om rajadhirajaya prasahya sahine. namo vayam Vaishravanaya kurmahe.
Sa me kaman kama kamaya mahyam. kameshvaro Vaishravano dadatu.
Kuberaya Vaishravanaya. maharajaya namah.

Text checked against: Mantrapushpam (Vedic mantras with svara), ed. Swami Devarupananda, Ramakrishna Math, Khar, Bombay; 4th edition (first edition December 1989 per the preface). Meanings, audio and all scripts at nityapaath.com/mantra-pushpam-full/